## सङ्ख्यायाः सञ्ज्ञासङ्घसूत्राध्ययनेषु। (५८/१७२४)

'तदस्य परिमाणम्' (५.१.५७/१७२३) इति वर्तते। [1]सङ्ख्यावाचिनः [1]प्रातिपदिकात् परिमाणोपाधिकात् प्रथमासमर्थादस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति। सञ्ज्ञासङ्घसूत्राध्ययनेषु इति प्रत्ययार्थविशेषणम्। तत्र सञ्ज्ञायां स्वार्थे प्रत्ययो [2]वाच्यः[3] (म. भा. २.३५२)। [4]पञ्चैव पञ्चकाः शकुनयः। त्रिकाः शालङ्कायनाः। [5]सङ्घ – [6]पञ्च परिमाणमस्य पञ्चकः [7]सङ्घः। अष्टकः। [8]सूत्र – अष्टौ अध्यायाः परिमाणमस्य सूत्रस्य अष्टकं पाणिनीयम्। दशकं वैयाघ्रपदीयम्। त्रिकं काशकृत्स्नम्। ननु चाध्यायसमूहः सूत्रसङ्घ एव भवति ? नैतदस्ति। [9]प्राणिसमूहे सङ्घशब्दो रूढः। अध्ययन – पञ्चकोऽधीतः[10]। सप्तकोऽधीतः। अष्टकः। नवकः[11]। [12]अधीतिरध्ययनम्। तस्य सङ्ख्यापरिमाणं पञ्चावृत्तयः पञ्चवाराः पञ्च रूपाणि अस्याध्ययनस्य पञ्चकमध्ययनम्।

[५१६] स्तोमे डविधिः पञ्चदशाद्यर्थः। (म. भा. २.३५४)

पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशः [13]स्तोमः। सप्तदशः। एकविंशः।

[५१७] शन्शतोर्डिनिश्छन्दसि[14]।

'पञ्चदशिनोऽर्धमासाः' (तै. सं. ७.५.२०१) 'त्रिंशिनो मासाः' (तै. सं. ७.५.२०१)।

[५१८] विंशतेश्चेति वक्तव्यम्।

विंशिनोऽङ्गिरसः॥

## पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्। (५९/१७२५)

'तदस्य परिमाणम्' (५.१.४७/१७२३) इति [15]वर्तते। पङ्क्त्यादयः शब्दा निपात्यन्ते। [16]यदिह लक्षणेनानुपपन्नं [17]तत्सर्वं निपातनात् [18]सिद्धम्। पञ्चानां टिलोपः [19]तिश्च प्रत्ययः। पञ्च[20] परिमाणमस्य पङ्क्तिश्छन्दः। [21]द्वयोर्दशतोः विन्भावः शतिश्च प्रत्ययः। द्वौ दशतौ परिमाणमस्य सङ्घस्य विंशतिः। (म. भा. २.३५५)। त्रयाणां दशतां त्रिन्भावः शत् च प्रत्ययः। त्रयो दशतः परिमाणमस्य त्रिंशत्। चतुर्णां [22]दशतां चत्वारिन्भावः शत् च प्रत्ययः। चत्वारो दशतः परिमाणमस्य चत्वारिंशत्। पञ्चानां दशतां [23]पञ्चाभावः शत् च प्रत्ययः। पञ्च दशतः परिमाणमस्य पञ्चाशत्। षण्णां [24]दशतां षड्भावः, तिः प्रत्ययोऽपदत्वं च। षड् दशतः परिमाणमस्य षष्टिः। सप्तानां दशतां [25]सप्तभावः तिः प्रत्ययश्च। सप्त दशतः परिमाणमस्य सप्ततिः।

---

1. प्रातिपदिकात् नास्ति क. फ. ह. 2. उत्पाद्यः म. भा. 3. अन्यत्र विशेषणीयो वाच्यः इत्यधिकम् क. 4. एव नास्ति ह. 5. सङ्घे च क. ड. फ. 6. पञ्च परिमाणमस्य नास्ति क. 7. सङ्घः नास्ति फ, सप्तकः सङ्घः इत्यधिकम् फ. 8. सूत्रे ड. 9. प्राणि नास्ति फ. 10. पञ्चकः इत्यधिकम् फ. 11. दशकः इत्यधिकम् फ. 12. अधीतेः क. 13. स्तोमः नास्ति क. 14. वक्तव्यः इत्यधिकम् फ. 15. अनुवर्तते फ. 16. यद् इत्यधिकम् ब. 17. तत् इत्यधिकम् ब. 18. साध्यते क. 19. च नास्ति अ. ब. ड. इ. 20. पदानि इत्यधिकम् ड. 21. दशतेः विस्तारः विंशतिः क. 22. दशतां नास्ति क. 23. पञ्चभावः आशत् च प्रत्ययः फ. 24. दशताम् नास्ति क. फ. 25.सप्तभावः नास्ति क. फ.